नितम्बिनीनां सुपयोधराणा-
मालिङ्गनान्याशु हरन्ति दाहम् ॥
वाप्यः कमलहासिन्यो जलयन्त्रगृहाः शुभाः ।
नार्य्यश्चन्दनदिग्धाङ्ग्यो दाहदैन्यहरा मताः ॥”

इति पित्तज्वराधिकारः ॥ * ॥ * ॥

अथ श्लेष्मज्वराधिकारः । तत्र श्लेष्मज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां संप्राप्तिमाह ।

“श्लेष्मलाहारचेष्टाभ्यां कफ आमाशयाश्रयः ।
बहिर्निरस्य कोष्ठाग्निं ज्वरकृत् स्याद्रसानुगः ॥”

कफस्य कोष्ठाग्नितेजसो बहिर्नयनेन पक्तृत्वादाशङ्कायां जातायां पित्तस्येव सिद्धान्तो बोद्धव्यः ॥ * ॥ अथ तस्य पूर्व्वरूपमाह । कफान्नान्नाभिनन्दनमिति । कफात् ज्वरे उत्पत्स्यति अन्नानभिलाषः स्यात् । स च श्रमादिपूर्व्वको भवति ॥ * ॥ अथ श्लेष्मज्वरस्य लक्षणमाह ।

“स्तैमित्यं स्तिमितो वेग आलस्यं मधुरास्यता ।
शुक्लमूत्रपुरीषत्वं स्तम्भस्तृप्तिरथापि च ॥
गौरवं शीतमुत्क्लेदो रोमहर्षोऽतिनिद्रता ।
प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोऽति-
शुक्लता ॥

स्तैमित्यं अङ्गानामार्द्रपटावगुण्ठितत्वमिव । स्तिमितो वेगः ज्वरस्य मन्दवेगः । आलस्यं समर्थस्यापि कर्म्मण्यनुत्साहः । स्तम्भः अङ्गानम्रता । तृप्तिः अन्नाभिलाषे सत्यपि भोजनासामर्थ्यम् । गौरवं गात्राणाम् । शीतं शीतं लगति । उत्क्लेदः वमनोपस्थितिरिव । अतिनिद्रता निद्राधिक्यम् । प्रतिश्यायो नासारोगविशेषः । अरुचिः भोजनानिच्छा । चकारात् पिड़का शीता मुखप्रसेकश्छर्द्दिस्तन्द्रा हृदयोपलेप उष्णाभिलाषो वह्निमान्द्यमिति । यत उक्तम् ।

“प्रसेकः पिड़काः शीताश्छर्द्दिस्तन्द्रोष्णकामिता ।
कफेन लिप्तहृदयं भवेदग्नेश्च मन्दता ॥”

अथ श्लेष्मज्वरचिकित्सा ।

“आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधा-
पयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥”

इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने श्लेष्मज्वरिणो लङ्घनविधाने विशेषमाह सुश्रुतः । श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजमिति । द्वादशाहेन लङ्घनवता अतीतेनेत्यर्थः ॥ * ॥ किन्तद्भेषजं तदाह ।

“पिप्पल्यादिकषायन्तु कफजे परिपाचनमिति ।”

पिप्पल्यादिगणमाह ।

“पिप्पली पिप्पलीमूलं मरिचं गजपिप्पली ।
नागरं चित्रकं चव्यं रेणुकैलाजमोदिका ॥
सर्षपो हिङ्गु भार्गी च पाठेन्द्रयवजीरकाः ।
महानिम्बश्च मूर्व्वा च विषा तिक्ता विड़ङ्गकम् ॥
पिप्पल्यादिगणो ह्येष कफमारुतनाशनः ।
गुल्मशूलज्वरहरो दीपनश्चामपाचनः ॥”

इति पिप्पल्यादिक्वाथः ॥

“क्षौद्रोपकुल्यासंयोगः श्वासकासज्वरापहः ।
प्लीहानं हन्ति हिक्काश्च बालानामपि शस्यते ॥
पिप्पलीं त्रिफलाञ्चापि समभागां ज्वरी लिहन् ।
मधुना सर्पिषा वापि कासी श्वासी सुखी
भवेत् ॥ * ॥
कट्फलं पौष्करं शृङ्गी कृष्णा च मधुना सह ।
श्वासकासज्वरहरो लेहोऽयं कफनाशनः ॥”

इति चातुर्भद्रिकावलेहः ॥ * ॥

“कट्फलं पौष्करं शृङ्गी यवानी कारवी तथा ।
कटुत्रयञ्च सर्व्वाणि समभागानि चूर्णयेत् ॥
आर्द्रकस्य रसैर्लिह्यान्मधुना वा कफज्वरी ।
कासश्वासारुचिच्छर्द्दिश्लेष्मानिलनिवृत्तये ॥”

इत्यष्टाङ्गोऽवलेहः ॥ * ॥

“सिन्धुवारदलक्वाथं कणाढ्यं कफजे ज्वरे ।
जङ्घयोश्च बले क्षीणे कर्णे च पिहिते पिबेत् ॥
यवानी पिप्पली वासा तथा खाखसवल्कलम् ।
एषां क्वाथं पिबेत् कासे श्वासे च कफजे ज्वरे ॥
वासाक्षुद्रामृताक्वाथः क्षौद्रेण ज्वरकासहृत् ॥”

इति वासादिक्वाथः ॥ * ॥

“मरिचं पिप्पलीमूलं नागरं कारवी कणा ।
चित्रकं कट्फलं कुष्ठं ससुगन्धिवचा शिवा ॥
कण्टकारी जटा शृङ्गी यवानी पिचुमर्द्दकः ।
एषां क्वाथो हरत्येव ज्वरं सोपद्रवं कफात् ॥”

इति मरिचादिक्वाथः ॥

वातज्वराधिकारोक्तकल्पतरुरसोऽपि । श्लेष्मज्वरे दातव्यस्तस्य कफव्याधिहरत्वात् ॥ * ॥

“सिन्धुत्रिकटुराजीभिरार्द्रकैर्वा कफे हितः ॥”

कवल इति शेषः ॥ * ॥ अथान्नमाह ।

“मुद्गयूषौदनो देयो ज्वरे कफसमुत्थिते ॥”

इति श्लेष्मज्वराधिकारः ॥ * ॥

अथ वातपित्तज्वराधिकारः । तत्र द्वन्द्वजज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां संप्राप्तिमाह । तत्र वातपित्तज्वरस्य ।

“वातपित्तकरैर्व्वातपित्ते आमाशयाश्रये ।
बहिर्निरस्य कोष्ठाग्निं रसगे ज्वरकारिणी ॥”

स्यातामिति शेषः ॥ * ॥

अथ तस्य पूर्व्वरूपमाह ।

“प्राग्रूपे वातपित्तस्य भवतो वातपैत्तिके ॥”

ज्वर इति शेषः ॥ * ॥

अथ वातपित्तज्वरस्य लक्षणमाह ।

“तृष्णा मूर्च्छा भ्रमो दाहो निद्रानाशः शिरो-
रुजा ।
कण्ठास्यशोषो वमथू रोमहर्षोऽरुचिस्तमः ॥
पर्व्वभेदश्च जृम्भा च वातपित्तज्वराकृतिः ॥”

पर्व्वभेदः पर्व्वाणि भिद्यन्त इवेति सन्धिषु व्यथा ॥

अथ वातपित्तज्वरस्य चिकित्सा ।

“वातपित्तज्वरे देयमौषधं पञ्चमेऽहनि ।
किराततिक्तममृतां द्राक्षामामलकीं शटीम् ।
निष्क्वाथ्य सगुड़ं क्वाथं वातपित्तज्वरे पिबेत् ॥”

इति किरातादिक्वाथः ॥ * ॥

“गुड़ूची पर्पटो मुस्तं किरातो विश्वभेषजम् ।
वातपित्तज्वरे देयं पञ्चभद्रमिदं शुभम् ॥”

इति पञ्चभद्रक्वाथः ॥ * ॥

“त्रिफलाशाल्मलीरास्नाराजवृक्षाटरूषकैः ।
शृतमम्बु हरत्याशु वातपित्तभवं ज्वरम् ॥”

इति त्रिफलादिक्वाथः ॥ * ॥

“मधुकं सारिवा द्राक्षा मधूकं चन्दनोत्पलम् ।
काश्मीरफलकं लोध्रं त्रिफला पद्मकेशरम् ॥
परूषकं मृणालञ्च क्षिपेत् संचूर्ण्य वारिणि ।
निशोषितं सिताक्षौद्रलाजयुक्तञ्च तत् पिबेत् ।
वातपित्तज्वरं दाहं तृष्णामूर्च्छारुचिभ्रमान् ॥
शमयेद्रक्तपित्तञ्च जीमूतमिव मारुतः ॥”

अत्र मधुकादिमृणालान्तं समुदितं पलपरिमितं संचूर्ण्य क्षिपेत् वारिणि षट्पलपरिमिते । मधुकादिर्हिमो दाहे ॥ * ॥

अथान्नमाह ।

“मुद्गामलकयूषस्तु वातपित्तज्वरे हितः ।
महादाहे प्रदातव्यो यूषश्चणकसम्भवः ॥”

दाड़िमामलकमुद्गसम्भवो यूष उक्त इति वातपैत्तिके ।

“कफपित्तहरा मुद्गाः कारवेल्लादयस्तथा ।
प्रायेण न च ते देया वातपित्तोत्तरे ज्वरे ॥
एतास्तु ज्वरविष्टम्भशूलोदावर्त्तकारिणः ॥”

इति वातपित्तज्वराधिकारः ॥ * ॥

अथ वातश्लेष्मज्वराधिकारः । तत्र तस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां सम्प्राप्तिमाह ।

“वातश्लेष्मकरैर्व्वातकफावामाशयाश्रयौ ।
बहिर्निरस्य कोष्ठाग्निं रसगौ ज्वरकारिणौ ॥”

पूर्व्वरूपमाह ।

“प्राग्रूपे वातकफयोः स्यातां वातकफज्वरे ॥”

तस्य लक्षणमाह ।

“स्तैमित्यं पर्व्वणां भेदो निद्रागौरवमेव च ।
शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्त्तनम् ॥
सन्तापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः ॥”

स्वेदाप्रवर्त्तनं स्वेदस्य आ समन्ताद्भावेन प्रवृत्तिः ॥
तथाह हारीतः ।

“शिरोग्रहः स्वेदभवश्च कासो
ज्वरस्य लिङ्गं कफवातजस्येति ॥”

स्वेदभवः स्वेदोत्पत्तिः ॥ * ॥

ननु स्वेदः पित्तस्य धर्म्मः अतएव पित्तज्वरे कक्षौष्ठमुखनासानां पाकः स्वेदश्च जायत इत्युक्तम् । तस्मात् कथं वातश्लेष्मज्वरे स्वेदस्यातिप्रवृत्तिः । उच्यते । विकृतिविषमसमवायारब्धत्वान्न दोष इति कार्त्तिकः । प्रकृतिसमसमवायस्य विकृतिविषमसमवायस्य चायमर्थः । प्रकृत्या हेतुभूतया समः कारणानुरूपः समवायः कार्य्यकारणभावः सम्बन्धः प्रकृतिसमसमवायः कारणानुरूपं कार्य्यमिति यावत् । यथा प्रकृतेर्यथास्थितैः शुक्लैस्तन्तुभिः समवायकारणैरारब्धः पटः शुक्ल एव भवति । तथा प्रकृतेन केवलेन वातेन पित्तेन कफेन वा जनितो ज्वरो वाताद्युचितैर्धर्म्मैर्व्विषमधुवेगाधिक्य-